५६. –b) दे$_3$ मौना (→मौनी). –c) दे$_{2.3}$ जपेन्मंत्रं (→जपेत् साक्षाद्). –d) दे$_{2.3}$ साक्षाद्देवस्य (→देव देवस्य).
५४ . श्लोकानन्तरं दे$_1$ हस्तलेखे श्लोक संख्या ४५ संख्यातः प्रारब्धा.
५९. –a) दे$_3$ अर्धलक्षं र * स्यं चे.
६०. –a) दे$_3$ भिक्षु (→भिक्षुको); दे$_3$ दोषा (→दोषाद्). –b) दे$_2$ यहि (→यदि). –c) दे$_3$ वनस्थस्य (→वनस्थश्च).
६१. –c) दे$_{2.3}$ त्वत्पादं (→तत्पादं).
६२. –a) दे$_{1.2}$ त्रयो वेदाः, दे$_3$ त्रयी वेदाः (→त्रयो वेदा). –b) दे$_3$ पर्या° (→पर्य°). –c) दे$_3$ अतः (→अन्तः).

अहो प्रणवमाहात्म्यं मया वक्तुं न शक्यते ।
सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ॥ ६३ ॥

मुच्यते सर्वदोषेभ्यः प्रणवाभ्यासतत्परः ।
व्रतानि सर्वदानानि तपांसि सुबहूनि च ॥ ६४ ॥

वेदाभ्यासश्च यज्ञाश्च तीर्थयात्रा तथैव च ।
अन्यानि यानि कर्माणि विशिष्टानि श्रुतौ स्मृतौ ॥ ६५ ॥

अस्याभ्यासेन तत्सर्वे न समं विद्धि सुव्रत ।
बहुनोक्तेन किं ब्रह्मन् वदामि तव सादरम् ॥ ६६ ॥

प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ।
प्रणवो ह्यपरं ब्रह्म प्रणवः परमं पदम् ॥ ६७ ॥

ओंकारेण प्लवेनैव संसाराब्धि तरेद् द्विजः ।
प्रणवेन प्रदीपेन स्वात्मानं ब्रह्म पश्यति ॥ ६८ ॥

वर्णाश्रमपरिभ्रष्टा ये नरा मूढचेतसः ।
तेऽपि पापार्णवं तीर्त्वा ज्ञानं लब्ध्वा शिवं ययुः ॥ ६९ ॥

तस्मात् सर्वप्रयत्नेन सादरं सर्वदा मुने ।
अस्याभ्यासेन चात्मानमाश्रयान्यद् भृशं त्यज ॥ ७० ॥

इत्युपपुराणे वासिष्ठलिङ्गे सप्तमोऽध्यायः ॥ ७ ॥

●

---

६४. –a) दे$_{2.3}$ °दोषेण (→°दोषेभ्यः). –b) दे$_1$ प्रणवाभ्यांस- (→प्रणवाभ्यास). –d) दे$_2$ सुबह्वनि (→सुबहूनि).
६५. –b) दे$_1$ चा (→च).
६६. –a) दे$_{2.3}$ तत्सर्वं (→तत्सर्वे).
६७. –b) दे$_3$ भय (→भयं).
६८. -a) दे$_1$ लवेनैव (→प्लवेनैव). –b) दे$_2$ संसारा * (→संसाराब्धि). -c) दे$_2$ प्रादीपेन (→प्रदीपेन).
६९. –d) दे$_2$ ल * (→लब्ध्वा); दे$_3$ शिव (→शिवं).
७०. –c) दे$_3$ अस्या * सेन (→अस्याभ्यासेन).

**पुष्पिका**–दे$_{2.3}$ °लैङ्गे (→°लिङ्गे)
दे$_3$ पुस्तके 67 श्लोकस्य b चरणानन्तरं–
प्रणवो ह्यपरं ब्रह्मन् वदामि तव सादरं ॥ ६७ ॥
प्रणवे नित्य युक्तस्य न भयं विद्यते क्वचित् ।

## ८

### ईश्वर उवाच ।

दानं प्रतिग्रहश्चैव यजनं याजनं तथा ।
अध्यापनं चाध्ययनं मुने वेदार्थवित्तम ॥ १ ॥

षट् कर्माणि विधीयन्ते ब्राह्मणस्य सदा श्रुतौ ।
षण्णां तु कर्मणां मध्ये त्रीणि कर्माणि जीविका ॥ २ ॥

याजनाध्यायने तद्वद् विशुद्धेभ्यः प्रतिग्रहः ।
क्षत्रियस्य च वैश्यस्य दानमध्ययनं तथा ॥ ३ ॥

यज्ञश्च धर्म इत्युक्तः क्षत्रियस्य विशेषतः ।
अन्यायवर्तिनां दण्डं युद्धं चोक्तं क्रमेण तु ॥ ४ ॥

कृषिर्वैश्यस्य धर्मः स्याद् विशेषेण महामुने ।
इतरेषां तु वर्णानां शुश्रूषा या प्रियेण सा ॥ ५ ॥

शूद्राणां धर्म इत्युक्तः संग्रहेण मया तव ।
चत्वार आश्रमा प्रोक्ता ब्रह्मचारी गृही वनी ॥ ६ ॥

संन्यासी च मुने तेषामन्यो नास्ति श्रुतौ स्मृतौ ।
भिक्षाचर्या गुरोर्नित्यं शुश्रूषा च महामुने ॥ ७ ॥

---

८

१. –c) दे$_2$ चाद्धयानं (→चाध्ययनं).

२. –a) दे$_3$ कर्मा * (→कर्माणि). –b) दे$_3$ ब्रह्मणस्य (→ब्राह्मणस्य). –c) दे$_2$ षण्णं, दे$_3$ *ण्णां (षण्णां); दे$_{2.3}$ कर्मणा भस्म (→कर्मणां मध्ये).

३. –a) दे$_1$ °ध्ययने (→ध्यायने).

४. –a) दे$_3$ इत्युक्तेः (→इत्युक्तः). –c) दे$_{1.2}$ दंडो, दे$_3$ दंडे (→दण्डं). –d) दे$_{2.3}$ चाकृ (→चोक्तं); दे$_{2.3}$ त्रिमेण (→क्रमेण).

५. –a) दे$_3$ कृषि (→कृषिर्); दे$_{2.3}$ धर्म (→धर्मः). –c) दे$_2$ वर्णाना (→वर्णानां).

६. –c) दे$_1$ आश्रमाः (→आश्रमा). –d) दे$_2$ ब्रह्मचरी (→ब्रह्मचारी).

७. –c) दे$_3$ गुरो (→गुरोर्); दे$_1$ नित्य (→नित्यं).

स्वाध्यायश्च तथा संध्या कर्म ब्रह्मविदां वर ।
अग्निकार्यं समासेन धर्मः स्याद् ब्रह्मचारिणः ॥ ८ ॥

पावकस्यातिथेश्चापि सदा ब्रह्मन् पुरःसरम् ।
अभ्यागतानां शुश्रूषा यज्ञो दानं शिवार्चनम् ॥ ९ ॥

गृहस्थस्य समासेन धर्मः प्रोक्तो मया तव ।
शाकमूलफलाशित्वं होमः स्वाध्याय एव च ॥ १० ॥

संविभागश्च सर्वेषां धर्मोऽयं वनवासिनः ।
नित्यकर्मपरित्यागो वैराग्यपरिपाकतः ॥ ११ ॥

भिक्षाशित्वं शिवध्यानं स्नानं संध्या सुभस्मना ।
आत्मज्ञानार्थमाचार्याद् वेदान्तश्रवणं सदा ॥ १२ ॥

धर्मोऽयं भिक्षुकस्योक्तो मया वेदार्थवित्तम ।
ब्रह्मचर्यवनस्थानां भिक्षुकाणां तथैव च ॥ १३ ॥

साधारणं मया प्रोक्तं तथा वै ब्रह्मचारिणाम् ।
स्वदारे मन्त्रतो ब्रह्मन् ऋतुकाले तु मैथुनम् ॥ १४ ॥

पर्ववर्जं गृहस्थस्य ब्रह्मचर्यं प्रकीर्तितम् ।
एवं वर्णाश्रमाचारो मया प्रोक्तः सनातनः ॥ १५ ॥

श्रद्धया मत्प्रसादार्थमाचरन्ति जनाश्च ये ।
तेषां नास्ति महाघोरे नरके वर्तनं मुने ॥ १६ ॥

वर्णाश्रमसमाचारात् सर्वे संसारवर्तिनः ।
ज्ञानं मद्विषयं लब्ध्वा यान्ति मत्परमं वपुः ॥ १७ ॥

---

८. –b) दे$_2$ ब्रह्मा (→ब्रह्म).

९. –b) दे$_{2.3}$ ब्रह्मन् श्रद्धा (→सदा ब्रह्मन्); दे$_3$ ** (→सरं). –c) दे$_3$ अ * गतानां (→अभ्यागतानां).

१०. –b) दे$_1$ धर्म (→धर्मः); दे$_2$ प्रोक्ता (→प्रोक्तो).

१२. –a) दे$_{2.3}$ °ध्यान (→°ध्यानं). –b) दे$_{2.3}$ संध्या स्नानं (→स्नानं संध्या).

१३. –c) दे$_2$ ब्रह्मचर्यं (→ब्रह्मचर्य).

१४. –d) दे$_3$ [ ऋ ] तु काले (→ऋतुकाले).

१७. –b) दे$_3$ संस * (→संसार). –c) दे$_2$ ल * (→लब्ध्वा).

वर्णाश्रमसमाचारं विना वेदविदां वर ।
वाञ्छन्ति मोक्षं ये मूढास्तेषां नास्त्येव निष्कृतिः ॥ १८ ॥

पुरा शाण्डिल्यसंज्ञस्तु ब्राह्मणः कश्चिदल्पवित् ।
वेदवादं परित्यज्य साहसी बुद्धिपूर्वकम् ॥ १९ ॥

परदारान् सदा गत्वा कृत्वा पापानि संततम् ।
वासुदेवं कुमार्गेण पूजयामास सुव्रत ॥ २० ॥

ततो विश्वात्मको विष्णुः प्रादुरासीत् स्वमायया ।
तस्याग्रतोऽपि संदृष्ट्वा पूजां चक्रे पुनः पुनः ॥ २१ ॥

ततो मायी हरिर्ब्रह्मंछाण्डिल्यं प्रत्यभाषत ।
धिक् शाण्डिल्य सुदुर्बुद्धे साहसी त्वमहो भृशम् ॥ २२ ॥

को वा वर्णाश्रमाचारं श्रौतं त्यक्तुं त्वया विना ।
शक्तः 'पापबलात्युक्तं नास्ति ते निष्कृतिः श्रुतौ ॥ २३ ॥

कुमार्गेणापि शाण्डिल्य कृता पूजा मम त्वया ।
अतः कालेन महता वेदमार्गे गमिष्यसि ॥ २४ ॥

तस्मात् पञ्चरात्रोक्तवर्त्मना श्रद्धया सह ।
मामाराधय शाण्डिल्य ब्राह्मणानपि भक्तितः ॥ २५ ॥

इत्युक्त्वा भगवान् विष्णुस्तत्रैवान्तरधीयत ।
शाण्डिल्योऽपि पुनर्ब्रह्मन् पञ्चरात्रं तु वैष्णवम् ॥ २६ ॥

---

१८. –b) दे$_2$ किना (→विना).
१९. –a) दे$_2$ शाडिल्य (→शाण्डिल्य). –c) दे$_3$ ** वेदां (→वेदवादं).
२०. –a) दे$_{2.3}$ परदारं (→परदारान्). –d) दे$_3$ सुव्रतं (→सुव्रत).
२१. –c) दे$_{2.3}$ तस्याग्रे सोपि तं दृष्ट्वा .
२२. –b) दे$_2$ *****, दे$_3$ प्रात्यभाषत (→प्रत्यभाषत). –c) दे$_2$ ***** दुर्षुद्धे, दे$_3$ धिक् धिक् शांडिल्य दुर्बुद्धे.
२३. –c) दे$_{2.3}$ बला (→बलात्); दे$_1$ त्यक्तुर्, दे$_2$ त्यक्तु (→त्यक्तुं). –d) दे$_1$ वास्ति (→नास्ति).
२४. –a) दे$_3$ शाण्डल्य (→शाण्डिल्य). –c) दे$_2$ महतो (→महता).
–d) दे$_{2.3}$ वेदमार्गं (→वेदमार्गे).
२५. –a) दे$_{1.2}$ तस्मात्त्वं (→तस्मात्); दे$_3$ तस्मात्व पंचरात्रांक्त.
–b) दे$_3$ वर्मना (→वर्त्मना).

परिगृह्य महाविष्णुं पूजयामास भक्तितः ।
पुनर्विष्णोः प्रसादेन वेदमार्गातिवर्तनी ॥ २७ ॥

शाण्डिल्यः संहितां चक्रे वैष्णवीं महतीं मुने ।
तस्यां चक्रुर्मुने दीक्षां पाषण्डाः पापयोनयः ॥ २८ ॥

स्थापितायां तु शाण्डिल्यः संहितायां ममार ह ।
पुनर्द्रंष्ट्राकरालास्याः क्रुद्धाः पाशधरा मुने ॥ २९ ॥

शूलहस्ता महाक्रूरनयनाः कृष्णविग्रहाः ।
निर्घृणाः सततं ब्रह्मन् यमदूता भयंकराः ॥ ३० ॥

बद्धवा पाशेन शाण्डिल्यं मार्गे दुष्कण्टके मुने ।
अधोमुखोर्ध्वपादं तं सर्वदाकृष्य मुद्गरैः ॥ ३१ ॥

पीड्यान्धकूपे निक्षिप्य यमराजस्य संनिधौ ।
निधायापीण्ड्य पादैस्ते पश्येत्यूचुर्यमं प्रति ॥ ३२ ॥

सोऽपि तं प्रेक्ष्य दुर्बुद्धिं यमराजो भयंकरः ।
प्राहातितीक्ष्णया वाचा पीड्यतां मम संनिधौ ॥ ३३ ॥

इत्युक्ते यमराजे तु शाण्डिल्यं यमकिंकराः ।
मुद्गरैः खड्गशूलाद्यैः पीडां चक्रुर्भृशं तदा ॥ ३४ ॥

पुनश्चाह यमः क्रुद्धो रक्तघूर्णितलोचनः ।
इष्टानामप्यनिष्टानां साधनं मातृवत् सदा ॥ ३५ ॥

---

२७. –d) दे$_{1.3}$ °वर्तिनी (→°वर्तनी).

२८. –b) दे$_3$ वैष्णवं (→वैष्णवीं); दे$_3$ महती (→महतीं). –c) दे$_1$तस्याश्र् (→तस्यां); दे$_2$ दीक्षा (→दीक्षां).

२९. –a) दे$_{2.3}$ शांडिल्य (→शाण्डिल्यः). –b) दे$_1$ महारहः (→ममार ह).
–d) दे$_{2.3}$ क्रुद्धा (→क्रुद्धाः).

३०. –b) दे$_3$ विग्र [ह] हाः (→विग्रहाः). –c) दे$_3$ निर्घूणात (→निर्घृणाः); दे$_1$ ब्रह्म (→ब्रह्मन्). –d) दे$_3$ य *°(→यम°).

३२. –b) दे$_3$ °राजास्य (→°राजस्य). –c) दे$_1$ निधाय° (→निधाया°); दे$_1$ पादौ ते (→पादैस्ते).

३३. –c) दे$_{2.3}$ प्रहस्य भीमया वाचा.

३४. –a) दे$_{2.3}$ यमराजेन (→यमराजे तु). –b) दे$_3$ शांडिल्य (→शाण्डिल्यं)–c) दे$_{2.3}$ मुद्गरै (→मुद्गरैः). –d) दे$_2$ °भृशां (→°भृशं); दे$_{2.3}$ मुने (→तदा).

३५. –b) दे$_3$ °घूणित° (→°घूर्णित°).

प्राप्तये परिहाराय बोधयन्ती श्रुतिर्यतः ।
बुद्धिपूर्वं परित्यक्ताऽनेन साक्षाद् दुरात्मना ॥ ३६ ॥

तस्मादेनं तु पापिष्ठं तत्पापविनिवृत्तये ।
रौरवादिषु सर्वेषु नरकेषु क्रमेण तु ॥ ३७ ॥

भोजयित्वा महादुःखान्यप्रसह्यान्यनेकशः ।
आगच्छध्वं सहानेन शाण्डिल्येन दुरात्मना ॥ ३८ ॥

इति संचोदिता ब्रह्मन् यमदूता यमेन तु ।
तथैव चक्रुः पापिष्ठमब्दानामयुतं सदा ॥ ३९ ॥

पुनश्चैनं समादाय यमदूता यमं ययुः ।
तं दृष्ट्वा यमराजोऽपि प्राह गम्भीरया गिरा ॥ ४० ॥

भद्रं भद्र त्वया भुक्तं कल्याण जीवदुःसहम् ।
पापानां फलमाश्चर्यं गच्छ विष्णोः पुरं सुखम् ॥ ४१ ॥

इत्युक्ते यमराजेन शाण्डिल्यो रथमास्थितः ।
स्वस्तिमङ्गलसंयुक्तः सुखं विष्णुपुरं गतः ॥ ४२ ॥

दृष्ट्वा शाण्डिल्यमनघं विष्णुर्भक्तहिते रतः ।
प्रसादमकरोदस्य पुनरेनमभाषत ॥ ४३ ॥

वेदमार्गपरित्यागफलं भुक्तं त्वयानघ ।
मत्तन्त्राश्रयेणैव मत्पूजा च कृता त्वया ॥ ४४ ॥

---

३६. –d) दे$_3$ साक्षां (→साक्षाद्).

३७. –b) दे$_1$ °द्धूतये (→°वृत्तये).

३८. –a) दे$_3$ °दु * न् (→°दुःखान्).

39. –b) दे$_3$ तुः (→तु). –d) दे$_1$ अज्ञानाम् (→अब्दानाम्).

४० –b) दे$_3$ प्रयुः (→ययुः).

४१. –a) दे$_3$ भद्र भद्रं (→भद्रं भद्र). –b) दे$_{2.3}$ कल्याणातीव दुःसहं. –d) दे$_{2.3}$ गव (→गच्छ); दे$_3$ सुरं (→पुरं).

४२. –a) दे$_{2.3}$ इत्युक्तो (→इत्युक्ते). –d) दे$_2$ °पुरीं, दे$_3$ °पुरी (→°पुरं).

४३. –b) दे$_3$ °भुक्त° (→°भक्त°). –d) दे$_2$ अभाषात्, दे$_3$ अभाषतः (→अभाषत).

४४. –b) दे$_3$ भुक्त (→भुक्तं). –c) दे$_{1-3}$ श्रयणेनैव (→श्रयेणैव). –d) दे$_{2.3}$ त्व (दे$_3$ त्वा) या कृता (→कृतात्वया).

तयाहं प्रीतवानस्मि तव शाण्डिल्य मे प्रियः ।
भूयोऽपि मत्प्रसादेन कर्मलोके द्विजोत्तम ॥ ४५ ॥

भूत्वा वर्णाश्रमाचारं श्रौतं कृत्वा यथाबलम् ।
मद्भक्त्याऽतीवसंयुक्तो ममाराधनतत्परः ॥ ४६ ॥

साक्षाद् ब्रह्मैकविज्ञानं ज्ञानं लब्ध्वा मृतो भव ।
इत्युक्तो विष्णुना ब्रह्मंच्छाण्डिल्यो भुवि जातवान् ॥ ४७ ॥

ब्राह्मणानां कुले शुद्धे साक्षादग्निसमो मुने ।
स पुनर्वासुदेवस्य प्रसादेन महामुने ॥ ४८ ॥

ब्रह्मचर्याश्रमे स्थित्वा वेदान् सम्यगधीतवान् ।
पुनः स्नात्वा गृही भूत्वा शान्तः सत्यपरायणः ॥ ४९ ॥

अग्नीनाधाय विधिवत् कृत्वा यागानन्तरम् ।
प्रनष्टपापः शुद्धात्मा ब्रह्मज्ञाने सदा शुचिः ॥ ५० ॥

अनित्यमीश्वरादन्यदिति ज्ञात्वा प्रसादतः ।
विरक्तः सर्वलोकेभ्यस्त्यक्त्वा कर्माणि सर्वतः ॥ ५१ ॥

आचार्यात् श्रुतवेदान्तो मत्प्रसादान्महामुने ।
सर्वलोकविधातारं सर्वज्ञं सर्वकारणम् ॥ ५२ ॥

सत्यबोधसुखानन्तमादिमध्यान्तवर्जितम् ।
अप्रमेयमनौपम्यमनिर्देश्यं शिवाभिधम् ॥ ५३ ॥

---

४५. –b) दे$_3$ शाण्डिल्या * (→शाण्डिल्य मे); दे$_{2.3}$ प्रिय (→प्रियः). –d) दे$_2$ द्विजोत्तमः (→द्विजोत्तम).

४६. –c) दे$_3$ °वीत (→°तीव); दे$_2$ संयुक्ते (→संयुक्तो).

४७. –c) दे$_3$ इत्युक्तौ (→इत्युक्तो).

४८. –c) दे$_2$ पुनः स, दे$_3$ स ** (→स पुनः).

४९. –a) दे$_2$ आश्रघ्ने (→आश्रमे). –d) दे$_2$ सत्या °(→सत्य°).

५०. –c) दे$_1$ शूद्रात्मा (→शुद्धात्मा).

५१. –a) दे$_2$ आनित्यम् (→अनित्यम्).

५२. –a) दे$_2$ आचार्या (→आचार्यात्); दे$_2$ छत° (→श्रुत°); दे$_3$ आर्चार्याघृत वेदांतो .

५३. –b) दे$_3$ एदि (→आदि). –d) दे$_3$ अनिर्दृश्यं (→अनिर्देश्यं); दे$_{2.3}$ शिवाभिधां (→शिवामिधं).

मामपश्यदयत्नेन मुने स्वात्मतया सदा ।
प्रारब्धकर्मप्राबल्यात् प्रपञ्चं प्रतिभासतः ॥ ५४ ॥

स मुक्तो भुक्तवान् भोगान् कञ्चितकालमनादृतः ।
स पुनः कर्मणामन्ते निवृत्तो विश्वमायया ॥ ५५ ॥

एवं वर्णाश्रमाचाराद् वेदसिद्धादयत्नतः ।
शाण्डिल्योऽपि विमुक्तोऽभूत् तच्छिष्याश्चैवमेव हि ॥ ५६ ॥

बहवोऽनेन मार्गेण पूता मद्रूपमागताः ।
वेदमार्गं विना ब्रह्मन्नास्त्युपायो विमुक्तये ॥ ५७ ॥

सर्वशास्त्राणि वेदाङ्गान्युपवेदास्तथैव च ।
पुराणानि तथा सांख्ययोगः पाशुपतस्तथा ॥ ५८ ॥

देशजातिकुलानां तु धर्माश्चान्ये महत्तराः ।
सर्वे वेदाविरोधेन प्रमाणं नान्यथा भवेत् ॥ ५९ ॥

या वेदवाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
सर्वास्ता निष्फलाः किंच प्रत्यवायस्य हेतवः ॥ ६० ॥

तस्मात् सर्वप्रयत्नेन ब्रह्मन् ब्रह्मविदां वर ।
त्यक्त्वा वेदविरुद्धानि वेदमेकं समाश्रय ॥ ६१ ॥

इति परमेश्वरवाक्यमभीष्टं श्रुतिवचनेन समं हृदि कृत्वा ।
श्रुतिहृदयं प्रणिपत्य महेशं श्रुतिमहिमानमवैत् स वसिष्ठः ॥ ६२ ॥

इत्युपपुराणे वासिष्ठलिङ्गे अष्टमोऽध्यायः ॥ ८ ॥

---

५४. –d) दे$_3$ प्रपंच (→प्रपञ्चं); दे$_1$ °भाश्चतः (→°भासतः).
५५. –b) दे$_3$ केचित् काल मनादतः. –c)दे$_2$ कर्मणं (→कर्मणां).
५६. –d) दे$_3$ तच्छिष्योः (→तच्छिष्याः).
५७ –c) दे$_3$ वद° (→वेद°).
५८. –a) दे$_3$ वेदांगोन् (→वेदांगान्). –c) दे$_{2.3}$ साख्यं (→सांख्य).
–d) दे$_{2.3}$ योगं पाशुपतं तथा.
५९ –a) दे$_{2.3}$ च (→तु).
६०. –a) दे$_{2.3}$ °वाह्या (→°वाह्याः). –c) दे$_{2.3}$ किं तु (→ किं च).
६१. –b) दे$_3$ ** (→ब्रह्मन्).
६२. –c) दे$_1$ हृदय (→हृदयं). –d) दे$_{2.3}$ वसिष्ठं (→वसिष्ठः).
**पुष्पिका**–दे$_{2.3}$ लैंगे (→लिंगे).

# १

## ईश्वर उवाच ।

युगं चतुर्विधं प्रोक्तं कालतत्त्वविशारदैः ।
तेषामाद्यं कृतं विद्धि ततस्त्रेतायुगं मुने ॥ १ ॥

तृतीयं द्वापरं विद्धि ततः कलियुगं मुने ।
ब्रह्मा कृतयुगस्यैव देवता परिकीर्तितः ॥ २ ॥

रविस्त्रेतायुगस्योक्तो द्वापरस्य मुने हरिः ।
रुद्रः कलियुगस्यापि त्रयाणामपि देवता ॥ ३ ॥

आद्यं सत्त्वगुणोद्रिक्तं विद्धि वेदविदां वर ।
त्रेता सत्त्वरजोमिश्रा द्वापरं केवलं रजः ॥ ४ ॥

चतुर्थं तामसं ब्रह्मन् विद्धि वेदार्थवित्तम ।
एको धर्मः सदा शुद्धो वृषभो नाम वाहनः ॥ ५ ॥

आद्ये धर्मश्चतुष्पादः स्थितस्त्रेतायुगे त्रिभिः ।
पादाभ्यां द्वापरे ब्रह्मन् कलौ पादेन तिष्ठति ॥ ६ ॥

आद्यं बलं द्विजस्यास्ति द्वितीये क्षत्रियस्य तु ।
तृतीये बलवान् वैश्यः शूद्रस्तु बलवान् कलौ ॥ ७ ॥

---



* दे$_{2.3}$ श्री ईश्वर उवाच ।

२. –d) दे$_{2.3}$ °कीर्तिता (→°कीर्तितः).

३. –a) दे$_{2.3}$ °स्योक्ता (→°स्योक्तो).

४. –a) दे$_3$ सत्वगुणे° (→सत्वगुणो°). –b) दे$_3$ वरा (→वर).

५. –a) दे$_3$ चतुर्थ (→चतुर्थं). –b) दे$_3$ वे*र्थ (→वेदार्थ).
–d) दे$_{2.3}$ मम वाहनं (→नाम वाहनः ) .

६. –d) दे$_1$ पादोन (→पादेन).

७. –d) दे$_1$ 'वान कलौ' (7d) इत्यारभ्य 'महामुने' (10d) यावत् द्विरावृत्तम् ;
दे$_2$ कलै (→कलौ).

कृते ध्यानं तपश्चैव कर्तुं शक्यमयत्नतः ।
ज्ञानयोगौ मुने शक्यौ त्रेतायामप्रमादतः ॥ ८ ॥

द्वापरे शक्यते कर्तुं योगो क्लेशेन सुव्रत ।
दानमेव कलौ शक्यं कर्तुं सर्वजनैः सदा ॥ ९ ॥

आद्ये पूर्णायुषः सर्वे सदातृप्ता हिते रताः ।
रूपयौवनसंपन्नाः सदा सर्वे महामुने ॥ १० ॥

त्रेतायां कलहश्चाल्पो जायते सर्वदेहिनाम् ।
क्षुत्पिपासा च वैषम्यं स्वल्पं विप्र प्रजायते ॥ ११ ॥

द्वापरे जायते लोभः क्रोधश्च धनहीनता ।
पुण्यकर्माप्रवृत्तिश्च भूयो भूयो विजायते ॥ १२ ॥

कलौ निन्दन्ति विद्वांसं ब्रह्मनिष्ठमकारणात् ।
विरक्तांश्चापि निन्दन्ति नराः सर्वत्र सर्वदा ॥ १३ ॥

धर्मिष्टं सर्वदा ब्रह्मन् बाधन्ते सर्वजन्तवः ।
ब्राह्मणं क्षत्रियं वैश्यं घ्नन्ति नीचा महामुने ॥ १४ ॥

मायावित्त्वमसूया च दम्भो दर्पश्च सुव्रत ।
कामः क्रोधश्च लोभश्च मोहोऽसत्यं सदा नृणाम् ॥ १५ ॥

वर्तते सर्वदा क्लेशो व्याधयश्चाधयस्तथा ।
केचिद् रुद्रं समाश्रित्य विष्णुं निन्दन्ति वैष्णवान् ॥ १६ ॥

अन्ये विष्णुं समाश्रित्य निन्दन्तीश्वरमव्ययम् ।
केचिद् ब्रह्माणमादित्यं केचिन्निन्दन्ति पावकम् ॥ १७ ॥

---

९. –b) दे$_2$ सुव्रता (→सुव्रत). –c) दे$_2$ कर्त्रुं, दे$_3$ कर्तुं (→शक्यं). –d) दे$_{2.3}$ शक्यं (→कर्तुं); दे$_1$ सर्वज्ञैः (→सर्वजनैः).

१०. –b) दे$_{2.3}$ नराः (→रताः). –c) दे$_1$ °सर्पनाः, दे$_{2.3}$ °संपन्ना (→°संपन्नाः).

११.. –c) दे$_2$ क्षत्पिपासा (→क्षुत्पिपासा). –d) दे$_2$ विजायते (→प्रजायते).

१४. –a) दे$_3$ * ह्मन् (→ब्रह्मन्). d) दे$_{2.3}$ शूद्रा (→नीचा).

१५. –a) दे$_2$ चं (→च). –b) दे$_3$ सुव्रता (→सुव्रत). –c) दे$_2$ कम, दे$_3$ काम (→कामः). –d) दे$_2$ स्येहो (→मोहो).

१६. –a) दे$_3$ स * दा (→सर्वदा).

१७. –c) दे$_3$ आदित्य (→आदित्यं).

आर्तं च रूपहीनं च विद्याहीनं महामुने ।
अर्थहीनं च निन्दन्ति धनवन्तो यथाबलम् ॥ १८ ॥

अनावृष्टिभयं चैव शस्यवाधास्तथैव च ।
अपहारोऽपि वित्तानां भूयो भूयो विजायते ॥ १९ ॥

देवताप्रतिमाः क्रोधान्नराश्चोत्पाटयन्ति च ।
अवमानं च कुर्वन्ति प्रतिमासु निरन्तरम् ॥ २० ॥

ब्राह्मणाः क्षत्रिया वैश्या निर्भया ब्रह्मवित्तम ।
त्यजन्ति स्वाश्रमं मोहाद् दुराचारा भवन्ति च ॥ २१ ॥

नाधीयन्त नरा वेदांच्छ्रद्धया मुक्तये मुने ।
जीवनार्थं मृषापाठं कुर्वन्ति परिमोहिताः ॥ २२ ॥

लेखनं पुस्तकं केचिच्छ्रुतेः कुर्वन्ति मोहिताः ।
ब्राह्मणाः क्षत्रिया वैश्या न यजन्ति कलौ युगे ॥ २३ ॥

अन्यानेन धनं ब्रह्मन् संपाद्य भुवि मानवाः ।
यजन्ति यशसे केचित् श्रद्धया न कदाचन ॥ २४ ॥

ब्राह्मणाः क्षत्रिया वैश्या शूद्रशिष्या भवन्ति च ।
त्रैवर्णिका मुने शूद्रं सेवन्ते धनवाञ्छया ॥ २५ ॥

संभाषणं सदा शूद्रैः स्पर्शनं भोजनं सह ।
कुर्वन्ति ब्राह्मणा वैश्या राजानश्च दिने दिने ॥ २६ ॥

---

१८. –a) दे$_3$ आर्त (→आर्तं). –c) दे$_3$ निदंति (→निन्दन्ति).

१९. –a) दे$_{2.3}$ नित्यं (→चैव). –b) दे$_{2.3}$ °नाशस् (→°बाधास्). –c) दे$_{2.3}$ अपहारश्च (→अपहारोऽपि). –d) दे$_{2.3}$ –भिजायते (→विजायते).

२०. –a) दे$_3$ दे * ता (→देवता). –d) दे$_3$ प्र *° (→प्रति°).

२२. –a) दे$_3$ नाधीयंते (→नाधीयन्त).

२३. –a) दे$_{2.3}$ पुस्तके (→पुस्तकं); दे$_1$ किंचित् (→केचित्). –b) दे$_{2.3}$ °धृतेः (→°च्छ्रुतेः).

२५. –a) दे$_1$ वैश्याः (→वैश्या). –d) दे$_1$ द्रवंते (→सेवन्ते).

२६. –b) दे$_2$ तथा (→सह); दे$_3$ स्पशन भोजने तथा.

शूद्रा राजानमाश्रित्य मन्त्रिणश्च भवन्ति हि ।
ब्राह्मणान् निर्घृणा नित्यं वाधयन्ति महामुने ॥ २७ ॥

स्नानहीनो नरो भुङ्क्ते जपहोमादिवर्जितः ।
देवताराधने नित्यं भवन्ति विमुखा जनाः ॥ २८ ॥

उद्धूलनं त्रिपुण्डं च भस्मना वेदमन्त्रतः ।
वेदमार्गपरिभ्रंशं कारयिष्यन्ति वै कलौ ॥ २९ ॥

किमत्र बहुनोक्तेन वसिष्ठ मुनिसत्तम ।
मर्यादा भिद्यते लोके लौकिकी न करिष्यति ॥ ३० ॥

लोहेन निर्मितैर्लोका युगान्ते समुपस्थिते ।
अङ्किताश्च भविष्यन्ति देवतायुधलाञ्छनैः ॥ ३१ ॥

नराणां नामरूपाभ्यां युगान्ते समुपस्थिते ।
अन्यानि यानि कर्माणि श्रौतानि मुनिसत्तम ॥ ३२ ॥

स्मार्तानि नाचरिष्यन्ति कलौ ब्रह्मन् नराः सदा ।
आम्नायं धर्मशास्त्रं च पुराणं भारतं मुने ॥ ३३ ॥

जल्पमात्रमिति ब्रह्मन् वदिष्यन्ति कलौ नराः ।
कुर्वन्त्यश्रौतकर्माणि श्रद्धया मुनिसत्तम ॥ ३४ ॥

स्वधर्मेऽभिरुचिर्नास्ति ब्राह्मणानां कलौ युगे ।
पञ्चरात्रं प्रशंसन्ति केचिद् भागवतं मुने ॥ ३५ ॥

---

२७. –b) दे$_3$ मत्रिणश्च (→मन्त्रिणश्च). –c) दे$_{2.3}$ निघृणा (→निर्घृणा). –d) दे$_3$ वाधयति (→वाधयन्ति).

२८. –d) दे$_3$ * मुखा (→विमुखा).

२९. दे$_{2.3}$ २९ cd -३० Θ .

३१. –a) दे$_{2.3}$ न करिष्यन्ति मोहेन. –b) दे$_2$° [ प ] स्थिते (→°पस्थिते). –d) दे$_2$ °युधु° (→°युध°).

३२. –a) दे$_2$ नम (→नाम). –c) दे$_3$ अन्या [ न ] (→अन्यानि).

३३. –a) दे$_3$ नचि° (→नाच°). –c) दे$_3$ [ च ] (→च).

३४. –b) दे$_2$ नारा (→नराः).

अश्रौतमूर्ध्वपुण्ड्रादि ललाटे श्रद्धया सह ।
धारयिष्यन्ति मोहेन युगान्ते समुपस्थिते ॥ ३६ ॥

केचित् कापालमिच्छन्ति केचित् पाशुपतं मुने ।
केचिद् बौद्धं प्रशंसन्ति केचिद् दैगम्बरं मुने ॥ ३७ ॥

केचिल्लोकायतं ब्रह्मन् केचित् सोमं महामुने ।
लाकुलं केचिदिच्छन्ति तथा केचित् तु भैरवम् ॥ ३८ ॥

केचिद् वामं प्रशंसन्ति केचिच्छाक्तं तथैव च ।
शांभवं केचिदिच्छन्ति यामलं भुवि केचन ॥ ३९ ॥

अन्यानि यानि शास्त्राणि विरुद्धानि महामुने ।
स्वतः प्रमाणभूतेन वेदेन मुनिसत्तम ॥ ४० ॥

तान्येव श्रद्धया युक्ताः परिगृह्य द्विजातयः ।
आचरन्ति महाधीरा युगान्ते समुपस्थिते ॥ ४१ ॥

शुक्लदन्ता महाधीरा मुण्डाः काषायधारिणः ।
शूद्रा धर्मं चरिष्यन्ति युगान्ते समुपस्थिते ॥ ४२ ॥

वेदविक्रयिणः केचित् तीर्थविक्रयिणः परे ।
यज्ञविक्रयिणः केचित् तपोविक्रयिणः परे ॥ ४३ ॥

देवविक्रयिणः केचित् तैलविक्रयिणः परे ।
क्षीरविक्रयिणः केचिदाज्यविक्रयिणः परे ॥ ४४ ॥

धान्यविक्रयिणः केचिज् जलविक्रयिणः परे ।
कन्याविक्रयिणः केचित् पशुविक्रयिणः परे ॥ ४५ ॥

---

३६. –a) दे$_1$ °पुड्डादि (→°पुण्ड्रादि). –b) दे$_1$ सत्वः (→सह).

३७. –a) दे$_1$ कपालं (→कापालं). –b) दे$_3$ पाशु [ प ] तं (→पाशुपतं). –c) दे$_1$ बौद्ध-(→बौद्धं). –d) दे$_3$ देगम्वरं (→दैगम्वरं).

३८. –c) दे$_1$ नाकुलं (→लाकुलं); दे$_3$ लाभ कुल केदिछन्ति.

३९. –a) दे3 वाम (→वामं). –d) दे$_2$ कचन (→केचन).

४०. –b) दे$_3$ वर्द्धानि (→विरुद्धानि).

४१. –a) दे$_{2.3}$ युक्ता (→युक्ताः). –b) दे$_{2.3}$ द्विजामुने (→द्विजातयः). –c) दे$_3$ महाधीराः (→महाधीरा).

४२. –b) दे$_3$ मुण्डाः कषाय° –c) दे$_{1.3}$ धर्म (→धर्मं).

४३. –c) दे$_3$ विक्र [ यि ] णः (→विक्रयिणः).

मांसविक्रयिणः केचित् सुराविक्रयिणः परे ।
पुत्रविक्रयिणः केचिद् दारविक्रयिणः परे ॥ ४६ ॥

भ्रातृविक्रयिणः केचिद् भविष्यन्ति कलौ नराः ।
ब्राह्मणान् पादयोर्बद्ध्वा हस्तयोर्निगडेन तु ॥ ४७ ॥

पीडयन्ति सदा शूद्रा धनार्थं राजसेवकाः ।
उच्चासनस्थान् शूद्रांश्च भूमौ स्थित्वा द्विजाः सदा ॥ ४८ ॥

स्वस्तिमङ्गलयुक्ताभिर्वाग्भिर्नित्यं स्तुवन्ति च ।
न क्षमन्ते द्विजान् शूद्रा मुने राजोपजीविनः ॥ ४९ ॥

शूद्राणां द्वारि सेवार्थं तिष्ठन्ति ब्राह्मणाः सदा ।
अध्यापयन्ति शूद्रांश्च ब्राह्मणा वेदवित्तम ॥ ५० ॥

पठन्ति वैदिकानर्थाम् शूद्राणामर्थसिद्धये ।
परदारपराः सर्वे भविष्यन्ति नराः सदा ॥ ५१ ॥

परभर्तृपरास्तद्वत् स्त्रियः सर्वाः स्वभावतः ।
मन्त्रौषधं समाश्रित्य दर्शयित्वा फलानि तु ॥ ५२ ॥

वेदमार्गपरिभ्रंशं कारयिष्यन्ति वै कलौ ।
किमत्र बहुनोक्तेन वसिष्ट मुनिसत्तम ॥ ५३ ॥

मर्यादा भिद्यते लोके लौकिकी वैदिकी तथा ।
वेदमार्गप्रतिष्टार्थं कृपयाऽहं महामुने ॥ ५४ ॥

सनकादिमुनीन्द्रेभ्यो दास्यामि ज्ञानमुत्तमम् ।
विष्णुश्च लोकरक्षार्थं मूर्तिमाश्रित्य कामपि ॥ ५५ ॥

---

४६. –b)दे3 जल,+सुरा° (→सुरा°). –d) दे1 दारा° (→दार°); दे3 दारविक्र*णः परे.

४८. – a) दे2 शूद्र- (→शूद्रा). –d) दे2.3 द्विजा (→द्विजाः).

४९. -b) दे3 वाग्भिर्नत्यं स्तु*ति च. –c) दे2 पमंते (→क्षमन्ते); दे2 द्विजानु (→द्विजान्).
–d) दे2°जीवितिनः (→°जीविनः).

५०. b)दे3 तिष्ठं तिष्ठंति (→तिष्ठन्ति). –d) दे2.3°वित्तमाः (→°वित्तम).

५२. – a) दे2 °पुरुष° (→ °भर्तृ°).

राक्षसानखिलान् हत्वा स्वस्वरूपं गमिष्यति ।
मन्नियोगाद्धरिः साक्षादतीव श्रद्धया सह ॥ ५६ ॥

कृष्णद्वैपायनो भूत्वा ब्रह्मचारी जितेन्द्रियः ।
वेदान्तानां प्रतिष्ठार्थं मुने सूत्रं करिष्यति ॥ ५७ ॥

जैमिनिर्व्यासशिष्यस्तु ममाज्ञावशमागतः ।
कर्मकाण्डप्रतिष्ठार्थं गृहस्थे नियतव्रत ॥ ५८ ॥

यज्ञदानतपोयुक्तः स्वयं सूत्रं करिष्यति ।
उभाभ्यां सुस्थितो लोके वेदमार्गो भविष्यति ॥ ५९ ॥

तस्मात्सर्वप्रयत्नेन कलिदोषनिवृत्तये ।
वेदमार्गे सदा स्थित्वा मोक्षकामनया द्विजः ॥ ६० ॥

कृत्वा कर्म यथाशक्ति ज्ञानेच्छायां ततः परम् ।
त्यक्त्वा सर्वाणि कर्माणि ज्ञानाभ्यासपरो भवेत् ॥ ६१ ॥

ज्ञानाभ्यासान्महापापान्मुच्यते नात्र संशयः ।
यथा दावानले क्षिप्तं तृणं पर्णं च दह्यते ॥ ६२ ॥

आर्द्रमप्यखिलं पापं ज्ञानाग्निर्दहते क्षणात् ।
कुर्वाणोऽपि च कर्माणि कदाचिदपि यः पुमान् ॥ ६३ ॥

श्रद्धाहीनोऽपि वेदान्तश्रवणे यदि यत्नवान् ।
नास्ति तस्य भयं किञ्चित् कलिदोषोऽपि नश्यति ॥ ६४ ॥

---

५६. –c) दे3 योगद् (→योगाद्). –d) दे2 श्राद्धया, दे3श्र * या (→श्रद्धया).

५८. –b) दे2 आगतं (→आगतः); दे3ममाज्ञाब * मागता. –d) दे2.3 गृहस्थो नियतव्रतः.

५९. –b) दे3 सूत्रा (→सूत्रं). –c) दे1 सुस्थिते (→सुस्थितो). –d) दे2 भविष्यते (→भविष्यति.).

६०. –d) दे3 °कामा°(→°काम°) .

६१. –b) दे2 ज्ञान °(→ज्ञाने°). –d) दे3°अभ्या *(→°अभ्यास).

६२. –c) दे3 क्षिप्त (→क्षिप्तं). –d) दे3 तृणां (→तृणं).

६३. –b) दे3 °दहति (→°दहते).

६४. –a) दे2 श्राद्धा °(→श्रद्धा).

अभोज्यभोजनो वापि कुत्सिताचारवानपि ।
ज्ञानाभ्यासपरो विप्रः सर्वपापैः प्रमुच्यते ॥ ६५ ॥

उदितं चेत् परं ज्ञानं ब्रह्मैव भवति स्वयम् ।
पुण्यपापप्रसङ्गोऽपि नास्ति ज्ञानात् परं मुने ॥ ६६ ॥

सर्वमात्मतया दृष्टं यतस्तस्मिन् द्विजोत्तम ।
अल्पायासो महानर्थनाशकः सर्वसौख्यदः ॥ ६७ ॥

ज्ञानाभ्यासो यतस्तस्माद्ज्ञानमेव सदाऽभ्यसेत् ।
मूककुम्भो यथा तोये क्षिप्तः कालेन सुव्रत ॥ ६८ ॥

पूर्णकुम्भो भवेत् तोयात् तद्वज्ज्ञानेन मानवः ।
यथाग्निस्तृणकाष्ठादिनिर्मिते मन्दिरे स्थितः ॥ ६९ ॥

मन्दिरं दहति ज्ञानं तद्वदज्ञानमन्दिरम् ।
नीचाऽपि कन्यका राज्ञा गृहीता महिषी भवेत् ॥ ७० ॥

सा पुनर्नावमान्यार्हा पूज्यैवाखिलमानवैः ।
तद्वज् ज्ञानी नरो राज्ञा गृहीतो भुवि मानवः ॥ ७१ ॥

स पुनर्नावमानार्हः पूज्य एव सुरासुरैः ।
ज्ञानाभ्यासफलस्यास्य विनाशो नास्ति सर्वदा ॥ ७२ ॥

तस्माद् वेदान्तवाक्यानामभ्यासः सर्वदोषहृत् ।
अथवा यो नरो गत्वा पुरीं वाराणसीं मम ॥ ७३ ॥

---

६५. –b) दे$_{3}$ °आचार* (→°आचार).
६६. –a) दे$_{1}$ उदिते (→उदितं).
६७. –a) दे$_{3}$ दृष्टों (→दृष्टं). –b) दे$_{2}$ यतस्तस्मा, दे$_{3}$ येनस्तस्मा (→यतस्तस्मिन्).
६८. –a) दे$_{1}$ ज्ञानो° (→ज्ञाना°). –b) दे$_{1}$ मानं (→ज्ञानं).
६९. –b) दे$_{1}$ तद्वद्, दे$_{2.3}$ तस्माद् (→तद्वज्).
७०. –a) दे$_{3}$* हति (→दहति).
७१. –a) दे$_{1}$ पुनर्नाय° (→पुनर्नाव°). –c) दे$_{1}$ तद्वद् (→तद्वज्); दे$_{2.3}$ तद्वज् (दे$_{1}$ द्) ज्ञानेव राज्ञा वै.
७२. –a) दे$_{1}$ पुनर्नीव° (→पुनर्नाव°). –c) दे$_{2.3}$ परस्यास्य (→फलस्यास्य).
७३. –b) दे$_{2}$ अभ्या *(→अभ्यासः).

श्रद्धाविनयसंयुक्तः प्रणम्य मणिकर्णिकाम् ।
तस्यां स्नात्वा महादेवं साक्षाद् विश्वेश्वरं शिवम् ॥ ७४ ॥

दृष्ट्वा प्रणम्य देवेशं समाराध्य यथाबलम् ।
उपोष्य दिनमात्रं वा मुच्यते कलिदोषतः ॥ ७५ ॥

अथवा ब्रह्मविच्छ्रेष्ठ यो नरः श्रद्धया सह ।
सुवर्णमुखरीं गत्वा स्नात्वा तस्यामुपोषितः ॥ ७६ ॥

श्रीकालहस्तिनाथं मां दृष्ट्वा भक्त्या प्रणम्य च ।
विजित्य कलिजान् दोषान् मुच्यते भवबन्धनात् ॥ ७७ ॥

अस्मादन्यं मुने स्थानं नास्ति संसारनाशकम् ।
अत्र ब्रह्मविदां श्रेष्ठ यत्किञ्चिच्छिवयोगिने ॥ ७८ ॥

ददाति यः पुमान् भक्त्या स याति परमां गतिम् ।
विषुवायनकालेषु यदत्र शिवयोगिने ॥ ७९ ॥

दत्तं तदक्षयं प्रोक्तं धार्मिकैर्वेदपारगैः ।
वाराणस्यां प्रदत्तं यत् तत् सहस्रगुणाधिकम् ॥ ८० ॥

अत्र दत्तमसंख्यातं कलिदोषस्य नाशनम् ।
तस्मादेतत् प्रयत्नेन भजेत् स्थानं नरः सदा ॥ ८१ ॥

अत्र भक्तिमतां नृणां नास्ति लोकत्रयेष्वपि ।
भीतिस्तस्मान्नरो भक्तिं कुर्यादत्रैव सर्वदा ॥ ८२ ॥

---

७५. –b) दे$_2$ समाराधा (→समाराध्य).

७६. –a ) दे$_2$ ब्राह्म° (→ब्रह्म°); –c) दे$_1$ मुखरी (→मुखरीं). –d) दे$_1$ उपेषितः (→उपोषितः).

७७. –a) दे$_2$ °हस्तिनाथ (→°हस्तिनाथं).

८०. –d) दे$_1$ सहस्रं (→सहस्र-).

८२. –c) दे$_{2..3}$ भक्ति (→ भक्तिं).

**अत्र देवमदृष्ट्वा यो मुक्तिमिच्छति सुव्रत ।**
**सोऽन्नं त्यक्त्वां विषं भुङ्क्ते क्षुधार्तः क्षुन्निवृत्तये ॥ ८३ ॥**

**इति तव परमं रहस्यमुक्तं श्रुतिशिरसि स्थितमादृतं मया ।**
**मुनिवरसङ्घपरम्परागतं परिहरणीयमिदं (?) त्वया मुने ॥ ८४ ॥**

**इत्युपपुराणे वासिष्ठलिङ्गे नवमोऽध्यायः ॥ ९ ॥**

---

८३. –d) $दे_3$ °वत्तये (→°वृत्तये).

८४. –a) $दे_{2.3}$ परम (→परमं); $दै_3$ * हेस्य (→रहस्य). –b) $दे_1$ मयापि (→मया). –c) $दे_2$ परमागत, $दे_3$ परंपनमागतं (→परम्परागतं). –d) $दे_{2.3}$ परिहरि°(→परिहर°).

**पुष्पिका**:– $दे_{2.3}$ वासिष्ठ लैङ् (→वासिष्ठलिङ्गे).

●

# १०

## ईश्वर उवाच ।

पुरा कल्पान्तरे ब्रह्मन् देवदारुवने शुभे ।
सर्वसिद्धिसमाकीर्णे देवदानवसेविते ॥ १ ॥

वापीकूपतडागाद्यैः सरिद्भिः समलंकृते ।
फलमूलसमाकीर्णे पर्वतैश्च समावृते ॥ २ ॥

भृग्वङ्गिरा वसिष्ठश्च विश्वामित्रोऽथ गौतमः ।
पुलस्त्यः पुलहश्चात्रिः सुकेशश्च क्रतुस्तथा ॥ ३ ॥

मरीचिः कश्यपश्चापि संवर्तः संगवानजः ।
ककुत्स्थः कालभद्रश्च काकोलूकः कणप्रियः ॥ ४ ॥

किरीटी रुद्रभक्तश्च किङ्किणी किंशुकप्रभुः ।
आदित्यवर्ण आयुष्मानाराध्यो दुरतिक्रमः ॥ ५ ॥

दुर्लभो दुन्दुभिर्दुर्गो दूतोदुः शीलवानपि ।
सुमन्तुः कौशिकः कण्वः कङ्कणादिमहर्षयः ॥ ६ ॥

चत्वारिंशत्सहस्राणि तथैवाष्टसहस्रकम् ।
तपश्चेरुर्महाप्राज्ञा कृच्छ्रचान्द्रायणादिभिः ॥ ७ ॥

---

१०

*. दे$_{2.3}$ श्री ईश्वर उवाच ।

२. –d) दे$_{3}$ समवृते (→ समावृते).

३. –a) दे$_{1}$ भृग्वङ्गिरवसिष्ठाश्च. –b) दे$_{3}$ वि * °(→विश्वा°); दे$_{2.3}$ °मित्रश्च (→मित्रोऽथ); दे$_{2}$ गोतमः (→गौतमः).

४. –a) दे$_{3}$ °चपि (→°चापि). –b) दे$_{3}$ अज (→अजः). –d) दे$_{3}$ कणः (→कण-).

५. –c) दे$_{2.3}$ आदित्य वर्ण रायुष्मान्.

६. –a) दे$_{1}$ दलम्भो (→ दुर्लभो). –b) दे$_{1}$ हतोदुः, दे$_{3}$ दुतोदु (→ दूतोदुः).

७. –b) दे$_{3}$ तथैवा सहस्रकाः.–c) दे$_{1.2}$ °प्राज्ञाः (→ °प्राज्ञा). –d) दे$_{2.3}$ कृछ्रं (→ कृच्छ्र-).

यजन्ति यज्ञैर्विविधैरीश्वरं श्रद्धया सह ।
अहं तेषां मुनीनां तु मायापाशनिवृत्तये ॥ ८ ॥

आत्मज्ञानप्रदानार्थं देवदारुवनं गतः ।
कल्याणं वेषमास्थाय मन्मायाशक्तिवैभवात् ॥ ९ ॥

विष्णुश्च मायया ब्रह्मन् भार्याऽभून्मम सुन्दरी ।
तया सह मुने क्रीडां कृत्वा वेषं दिगम्बरम् ॥ १० ॥

वर्णाश्रमसमाचारविनिर्मुक्तस्तया सह ।
अहं भिक्षाटनं तेषां मन्दिरे कृतवान् द्विज ॥ ११ ॥

मां दृष्ट्वा मायया नार्यो मोहिता मुनिपुंगव ।
त्यक्तवस्त्रा मुने काश्चित् काश्चित् त्यक्तविभूषणाः ॥ १२ ॥

काश्चिन्मां वीक्ष्य तिष्ठन्ति काश्चिदालिङ्गनोत्सुकाः ।
काश्चिन्मां भुङ्क्ष्व भुङ्क्ष्वेति प्रार्थ्य धावन्ति मां प्रति ॥ १३ ॥

महर्षीणां सुतास्तेपि मम भार्यां सुशोभनाम् ।
दृष्ट्वा मन्मथविद्धाङ्गा निर्लज्जा विवशा भृशम् ॥ १४ ॥

त्यक्तवस्त्राः समालिङ्ग्य भुक्तवन्तो महामुने ।
केचिन्मोहेन नृत्यन्ति मण्डितभ्रूविलासिनः ॥ १५ ॥

मुने केचित् करास्फोटं कुर्वन्ति परिमोहिताः ।
एवं नराणां नारीणां कुलं भ्रान्तमभून्मुने ॥ १६ ॥

तं दृष्टवा मुनयः सर्वे कुपिता मां प्रियां च मे ।
अतीव परुषं वाक्यं प्रोचुर्मां प्रति सुव्रताः ॥ १७ ॥

---

८. –c) दे2. 3 अथैतेषामहं शंभुः.
१०. –b) दे2 म *(→ मम). –d) दे3 वैषं (→ वेषं).
११. –c) दे2 अह (→ अहं).
१३. –c) दे1.3 कश्चिन्मां (→ काश्चिन्मां). –d) दे1 प्रोच्य (→ प्रार्थ्य).
१४. –b) दे3 समर्धाया (→ मम भार्यां); दे2 सुशोभना (→ सुशोभनाम्).
१५. –d) दे3 °विलासिन (→ °विलासिनः).
१७. –a) दे2 तद् (→तं). –c) दे3 परषुं (→परुषं). –d) दे2. 3 सुव्रत (→सुव्रताः).

शेपुश्च शापैर्मां ब्रह्मन् मायया मम मोहिताः ।
महामन्त्रैर्महाघोरैरभिचारः कृतो मम ॥ १८ ॥

तत्सर्वं विफलं ब्रह्मन्नभून्मय्याज्ञया मम ।
ते संभूय मुनिश्रेष्ठाः समुपेत्य महामुने ॥ १९ ॥

पृष्टवन्तो भवान् कस्त्वं किमुद्दिश्य त्वमागतः ।
इति पृष्टेन तैरुक्तं मया ब्रह्मविदां वर ॥ २० ॥

ईदृशोऽहमिति प्राज्ञाः पुनर्वक्ष्यामि कारणम् ।
इदानीं भार्यया सार्धं तपश्चर्तुमिहागतः ॥ २१ ॥

इति मद्वचनं श्रुत्वा मुनयो मुनिपुंगव ।
प्रोचुर्धिग् धिङ् महामूढ वस्त्रेणाच्छाद्य विग्रहम् ॥ २२ ॥

त्यक्त्वा भार्यां महादुष्टां मोहयन्तीं तपश्चर ।
इति तेषां वचः श्रुत्वा मम भार्या पतिव्रता ॥ २३ ॥

न कदाचिदियं दुष्टा न बुध्याऽप्यन्यमिच्छति ।
इत्युक्ताश्च मया ब्रह्मन् ब्राह्मणा मम मायया ॥ २४ ॥

संभूयातीव संक्रुद्धाः परुषं वाक्यमब्रुवन् ।
गच्छ गच्छ महादुष्ट भार्या ते व्यभिचारिणी ॥ २५ ॥

त्वं च वर्णाश्रमाचार – विहीनो बुद्धिपूर्वतः ।
नान्यमिच्छति भार्या म इति मिथ्या त्वयेरितम् ॥ २६ ॥

---

१९. –c) दे3 तेषां (→ते); °दे2 श्रेष्टा, दे3 °श्रेष्ठा (→°श्रेष्ठाः) .

२०. –b) दे3 कि * द्दिश्य (→किमुद्दिश्य).

२१. –a) दे2 प्राज्ञैः, (→प्राज्ञाः).

२२. –b) दे3 °पुंगवः (→°पुंगव). –c) दे2.3 प्रोचुधिक्धिक् महामूढ.

२३. –a) दे1 °हृष्टां (→°दुष्टां); दे3 त्यक्त्वा भर्या महादुष्टा. –b) दे3 मोहयंति (→मोहयन्तीं); दे2. तपाश्चर (→तपश्चर). –c) दे3 [व] वचः (→वचः).

२५. –a) दे1 सकष्टाः, दे2.3 संरुष्टाः (→संक्रुद्धाः).–b) दे3 परषं (→ परुषं); दे3 अव्रवन् (→अब्रुवन्).

२६. –a) दे3 आचार-आचार. –d) दे2.3 इत्यनृतं (→इति मिथ्या).

इत्याकर्ण्य वचस्तेषां सत्यमेवेरितं मया ।
मद्दृष्ट्या मम भार्येयं मयाऽभिन्ना ह्यविक्रिया ॥ २७ ॥

रागद्वेषभयक्रोधलोभमोहादिवर्जिता ।
पुण्यपापविनिर्मुक्ता सर्वदा परमार्थतः ॥ २८ ॥

अहं च सर्वदा विप्रा वर्णाश्रमविवर्जितः ।
न कर्ता न च भोक्ताऽहं न च कारयिता तथा ॥ २९ ॥

धर्माधर्मो न मे विप्राः सर्वदा परमार्थतः ।
भवतामात्मविज्ञानमशेषक्लेशनाशनम् ॥ ३० ॥

नास्ति देहात्मबोधेन कृतं कर्माखिलं सदा ।
मांसदृष्ट्या विलोक्यैनां मां च वेदविदां वराः ॥ ३१ ॥

दूषणान्युक्तवन्तस्तु यूयं तन्नास्ति मे सदा ।
इति मद्वचनं श्रुत्वा मुनयः क्रोधमूर्च्छिताः ॥ ३२ ॥

सर्वे विचार्य संभूय मामेवं पुनरब्रुवन् ।
अहो विरुद्धं भवता प्रोक्तं चोरेण साहसात् ॥ ३३ ॥

न कर्ता न च भोक्ताऽहं पुण्यपापविवर्जितः ।
वर्णाश्रमविनिर्मुक्तस्तपश्चर्तुमिहागतः ॥ ३४ ॥

इत्युक्ता मुनयः सर्वे मायया मम मोहिताः ।
लोष्टैश्च मुष्टिभिर्दण्डैस्ताडयां चक्रिरे भृशम् ॥ ३५ ॥

---

२७. –b) दे$_3$ °वेरित (→वेरितं). –c) दे$_1$ भार्येय(→भार्येयं). –d) दे$_1$ मथा° (→मया°) .

२९. –a) दे$_2$ विप्रा: (→विप्राः) .

३०. –a) दे$_{1.2}$ °धर्मौ (→°धर्मो), दे$_{2.3}$ विप्रा (→विप्राः). –d) दे$_1$°क्लेषं (→°क्लेश-).

३१. –b) दे$_3$ कृत कर्मा * लं सदा. –c) दे$_3$ वि * क्यैनां (→विलोक्यैनां). –d) दे$_3$ °विद विराः (→°विदां वराः).

३२. –a) दे$_1$ दूषणाभ्युक्त वर्तस्तु. –b) दे$_1$ पर्यन्तन्नासि मे सदा. –c) दे$_3$ श्रु * (→श्रुत्वा).

३३. –c) दे$_1$ अहं (→अहो). –d) दे$_1$ प्रोक्ताचारेण साहसात्.

३४ –c) दे$_3$ इत्युवर्णाश्रम विविमुक्त (?).

परिभूतेन तैर्ब्रह्मन् मया भिक्षाटनं कृतम् ।
दृष्ट्वा पूर्वं वसिष्ठस्य भार्यातीव पतिव्रता ॥ ३६ ॥

अरुन्धतीति विख्याता यथा भार्या तवानघ ।
मां प्रणम्य महाभक्त्या प्रत्युद्गम्य तपस्विनी ॥ ३७ ॥

प्रक्षाल्य पादौ तोयेन दत्त्वा चासनमादरात् ।
संप्रेक्ष्य शिथिलं देहमभिघातहतं द्विजैः ॥ ३८ ॥

संधयामास भैषज्यैर्दत्त्वा भिक्षां यथाबलम् ।
पुनश्च मां प्रणम्येदमब्रवीद् वचनं सती ॥ ३९ ॥

को भवान् कुत आयातः किमाचारो भवानिति ।
अहमप्युक्तवानेवं केवलं कृपयानघ ॥ ४० ॥

नाहं देवो न गन्धर्वो न यक्षो न च राक्षसः ।
न मनुष्यो न सर्पश्च न पशुर्न च पक्षिणः ॥ ४१ ॥

न च शब्दो न च स्पर्शो न च रूपरसादयः ।
नाहं पृथ्वी न सलिलं न च वह्निर्न चानिलः ॥ ४२ ॥

न चाकाशो न देहश्च न च प्राणो न चेन्द्रियम् ।
न कर्ताऽहं न भोक्ताऽहं न वर्णी न च आश्रमी ॥ ४३ ॥

न च विद्या न चाविद्या न साध्योऽहं न साधनम् ।
न साधकोऽहं कल्याणि सिद्धानां प्रवरोऽस्म्यहम् ॥ ४४ ॥

---

३६. –a) दे$_3$ परिभूतेनैव ब्रह्मन्. –b) दे$_3$ भिक्षाटन (→भिक्षाटनं). –c) दे$_{2.3}$ पूर्व (→पूर्वं).
३७. –d) दे$_1$ प्रत्युद्गत– (→प्रत्युद्गम्य).
३८. –d) दे$_1$ °कृतं, दे$_3$ °हत (→°हतं).
३९. –d) दे$_2$ व * नं (→वचनं).
४०. –b) दे$_1$ भावान् (→भवान्).
४१. –d) दे$_3$ -त्व- (→च).
४२. –d) दे$_3$ वह्निन (→वह्निर्न).
४३. –c) दे$_1$ त (→न), दे$_3$ भोक्ताह (→भोक्ताऽहं). –d) दे$_{2.3}$ वणी (→वर्णी); दे$_1$ नापि, दे$_{2.3}$ क्वापि (→न च).
४४. –c) दे$_3$ साधकोह (→साधकोऽहं).

नागतोऽहं महाप्राज्ञे व्योमवत्सर्वगः सदा ।
तथाऽपि मण्डलादस्मात् सौराद्वेदमयादहम् ॥ ४५ ॥

आगतो भार्यया सार्द्धमनया धर्मचारिणि ।
स्वच्छन्दवृत्तिराचारो मम चास्याश्च सुन्दरि ॥ ४६ ॥

त्वं च मामपि विद्ध्येवं मम वाक्यपरिग्रहात् ।
प्रसन्नोऽहं तवातीव गात्रशुश्रूषयानया ॥ ४७ ॥

इत्युक्त्वा तामहं ब्रह्मन्ननुगृह्य गृहान्तरम् ।
आगमं भार्यया सार्धं भैक्षार्थं मुनिसत्तम ॥ ४८ ॥

गच्छन्तं मुनयो दृष्ट्वा प्रोचुर्मां परिमोहिताः ।
तिष्ठ तिष्ठ सदा स्त्रीणां मोहनः पुरुषाधम ॥ ४९ ॥

लिङ्गमेतत् समुत्पाट्य वनेऽस्मिन् भार्यया विना ।
ततो लिङ्गं समुत्पाट्य तत्रैवान्तर्हितोऽभवम् ॥ ५० ॥

मां च लिङ्गं च मद्भार्यां नापश्यन् मुनयो मुने ।
उत्पातोऽभूत् तदा तत्र सर्वलोकभंयकरः ॥ ५१ ॥

न तदा राजते सूर्यो न चन्द्रो न च पावकः ।
भूकम्पश्च समुद्भूतो मन्त्रास्तेषां न भान्ति च ॥ ५२ ॥

एवं संक्षुभितेऽरण्ये मुनयः संशितव्रताः ।
परस्परं समालोक्य ब्रह्मलोकं समभ्ययुः ॥ ५३ ॥

---

४५. –d) दे$_3$ देह-° (→वेद-°).

४६. –b) दे$_1$ आगतो (→अनया). –c) दे$_3$ °राचा * (→°राचारो).

४७. –b) दे$_1$ मम वाक्यं परिग्रहम्. –d) दे$_{2.3}$ °मम (→°[अ]नया).

४८. –a) दे$_3$ मां (→तां). –d) दे$_3$ भक्ष्यार्थं (→भैक्षार्थं).

४९. –a) दे$_3$ गवातं (→गच्छन्तं). –c) दे$_3$ ति * त्यदा (→तिष्ठ सदा). –d) दे$_{2.3}$ मोहन (→मोहनः); दे$_1$ मोहनः पुरुषाधमः.

५०. –a) दे$_1$ एनत् (→एतत्); दे$_{2.3}$ समुत्पाद्य (→समुत्पाट्य). –c) दे$_{2.3}$ समुत्पाद्य (→समुत्पाट्य). –d) दे$_2$ अ * र्हितो° (→अन्तर्हितो°); दे$_3$ तत्रैवार्हितो भूयं.

५१. –c) दे$_3$ उत्पाता° (→उत्पातो°). –d) दे$_3$ भयंकराः (→भयंकरः).

५२. –d) दे$_1$ गन्तास् (→मन्त्रास्); दे$_3$ तेषा (→तेषां).

तस्मिन् दिव्यासनासीनं कोटिसूर्यसमप्रभम् ।
ब्रह्माणं मुनयो दृष्ट्वा स्तोत्रैः स्तुत्वाभिवन्द्य च ॥ ५४ ॥

ज्ञापयां चक्रिरे सर्वं मुनयो मुनिपुंगव ।
कश्चित् सभार्यः शान्तात्मा नग्नो विकृतलक्षणः ॥ ५५ ॥

वर्णाश्रमविनिर्मुक्तो देवदारुवनं गतः ।
मोहयामास सौन्दर्यान्नारीणां कुलमाशु नः ॥ ५६ ॥

तस्य भार्या च सौन्दर्याद् दूषयामास पुत्रकान् ।
दत्ताः शापाः परं धातस्ते च शापाः पराहताः ॥ ५७ ॥

अभिचारः कृतोऽस्माभिः सोऽपि देव पराहतः ।
अस्माभिर्मुष्टिभिर्दण्डैस्ताडितश्च परात्परम् ॥ ५८ ॥

सोऽपि स्वकीयमुत्पाट्य लिङ्गं त्यक्त्वा सुरेश्वर ।
तत्रैव भार्यया सार्द्धं क्षणादन्तर्हितोऽभवत् ॥ ५९ ॥

उत्पाताश्चाभवन् देव वयं भीताश्च शंकरः ।
कोऽयं सभार्यः पुरुषो देवदारुवनं गतः ॥ ६० ॥

भवन्तमेव शरणं प्रपन्ना वयमीश्वर ।
कारुण्येन त्वमस्माकं ब्रूहि सर्वज्ञ शाश्वत ॥ ६१ ॥

एवं विज्ञापितो ब्रह्मा ध्यात्वा मां त्रिपुरान्तकम् ।
स्तोत्रैः स्तुत्वा पुनर्बुध्वा मुनिभ्यः पर्यभाषत ॥ ६२ ॥

---

५४. –b) दे$_3$ °प्रभ (→°प्रभम्). –d) दे$_2$ स्तोत्रै, दे$_3$ स्तोत्रौ (→स्तोत्रैः).

५५. –b) दे$_3$ °पंगव (→°पुंगव).

५७. –a) दे$_3$ सौदर्याद् (→सौन्दर्याद्). –d) दे$_1$ शापा (→शापाः).

५८ –a) दे$_2$ आभिचारः (→अभिचारः).

५९. –b) दे$_1$ भुवीश्वरः (→सुरेश्वर).

६०, –b) दे$_2$ शंकरा, दे$_3$ संकारा (→शंकरः). –c) दे$_2$ पुरुषये (→पुरुषो).

६१. –c) दे$_2$ तमरस्माकं, दे$_3$ मतमास्माकं (→त्वमस्माकं).

६२. –c) दे$_{2.3}$ स्तोत्रै (→स्तोत्रैः); दे$_{2.3}$ मुने बुध्वा (→पुनर्बुध्वा). –d) दे$_3$ °भोषत (→°भाषत).

अहो महेश्वरः साक्षात् सर्वलोकैकनायकः ।
विष्णुना सह संप्राप्तो देवदारुवनं बुधाः ॥ ६३ ॥

भाग्यहीना भवन्तो हि दृष्ट्वाऽपि परिमोहिताः ।
भवद्भिः किं कृतं कर्म भवद्भिः किं कृतं वृथा ॥ ६४ ॥

जन्मान्तरसहस्रेषु कृतपुण्यफलं द्विजाः ।
अमुं विसृज्य मां प्राप्ताः वृथाहो मोहवैभवम् ॥ ६५ ॥

यस्माज्जातं जगत्सर्वं यस्मिन्नेव विलीयते ।
तमागतं शिवं दृष्ट्वा कथं मूर्खैरुपेक्षितम् ॥ ६६ ॥

वातादयो भयाद् यस्य स्वकार्येषु निरन्तरम् ।
प्रवर्तन्ते स ईशानो हा भवद्भिरुपेक्षितः ॥ ६७ ॥

यमासाद्य निवर्तन्ते विकल्पा मोहसंभवाः ।
तस्यापचारो मोहेन हा भवद्भिः कृतो द्विजाः ॥ ६८ ॥

कामक्रोधमहामोहविषवेगस्य भेषजम् ।
आगतो वेदकान्ताराद् हा भवद्भिरुपेक्षितः ॥ ६९ ॥

ध्यायन्ति योगिनो नित्यं हृदये यं जितेन्द्रियाः ।
तमागतं समासाद्य हा भवद्भिरुपेक्षितम् ॥ ७० ॥

यत्प्रसादेन देवानामैश्वर्यमचलं भवेत् ।
तमासाद्य महादेवं हा भवद्भिरुपेक्षितम् ॥ ७१ ॥

---

६४. दे$_{3.}$ $_{c}\Theta$. –a) दे$_3$ भवंती (→भवंतो). –b) दे$_{2.3}$ हि (→ऽपि); दे$_3$ °मो*ताः (→°मोहिताः). –d) दे$_3$ कृत (→कृतं).

६५. –a) दे$_3$ °सहस्रैषु (→°सहस्रेषु). –c) दे$_1$ प्राप्ता (→प्राप्ताः). –d) दे$_1$ वृथाहा (→वृथाहो); दे$_3$ °वैभव (→°वैभवं).

६६. –a) दे$_3$ सर्व (→°सर्वं). –d) दे$_1$ उपेक्षितः (→उपेक्षितं).

६७. –d) दे$_3$ हा भावद्भि रुपक्षितः.

६८. –a) दे$_3$ निवर्तं * (→निवर्तन्ते). –d) दे$_1$ भवद्भिश्च (→हा भवद्भिः).

६९. –a) दे$_2$ माका (→काम); दे$_3$ लोभ (→मोह).

७१. –b) दे$_3$ ऐश्वैर्यं (→ऐश्वर्यं).

यस्तु सर्वजगत्साक्षी नित्यानन्दो निरञ्जनः ।
तमागतं स्वयं मूर्खैर्हा भवद्भिरुपेक्षितम् ॥ ७२ ॥

एष ब्रह्मैष देवेन्द्र एष एव प्रजापतिः ।
एष धाता विधाता च सर्वात्मा सर्ववर्जितः ॥ ७३ ॥

शिवरुद्रमहेशानः शंकरः ब्रह्मसंज्ञितः ।
अभिधानाभिधेयादिभावहीनो निरास्पदः ॥ ७४ ॥

प्रत्यङ्मात्रः सदा स्वस्य भासा सर्वावभासकः ।
सर्ववस्तुतया साक्षात् स्वयमेव विजृम्भितः ॥ ७५ ॥

पञ्चक्लेशविनिर्मुक्तः श्रीमत्पञ्चाक्षराश्रयः ।
कृपया केवलं विप्र अमूर्तो मूर्तिमाश्रितः ॥ ७६ ॥

देवदारुवनं प्राप्तो विष्णुना विश्वयोनिना ।
तमेव मुक्तिदं बुद्ध्वा व्रजध्वं शरणं बुधाः ॥ ७७ ॥

इतः पूर्वं कृतं कर्म भवद्भिरखिलं वृथा ।
लिङ्गार्चनं विना तेन मोहिता देवमायया ॥ ७८ ॥

तद्भवद्भिर्यथा दृष्टं लिङ्गं भूमौ निपातितम् ।
तल्लिङ्गसदृशं लिङ्गं कृत्वा श्रद्धापुरस्सरम् ॥ ७९ ॥

पञ्चाक्षरेण मन्त्रेण प्रणवेन सहादरात् ।
पूजयध्वं सपत्नीकाः स्वपुत्रैरखिलैः सह ॥ ८० ॥

---

७२. –d) दे$_2$ °रपेक्षितं (→°रुपेक्षितम्).

७३. –a) दे$_{2.3}$ ब्रह्मर्षि (→ब्रह्मैष). –d) दे$_{2.3}$ °विद्विजाः (→°वर्जितः).

७४. –a) दे$_1$ महेशान (→महेशानः). –b) दे$_1$ शंकर (→शंकरः).

७५. –b) दे$_2$ * * * * भासकः

७६. –a) दे$_2$°क्लश (→°क्लेश). –c) दे$_{2.3}$ विप्रा (→विप्र). –d) दे$_1$ अमूर्तां (→अमूर्तो).

७७. –a) दे$_3$ प्रीक्तो (→प्राप्तो).

७८. –d) दे$_3$ मो * ता (→मोहिता).

७९. –a) दे$_3$ जगद्भव° (→तद्भव°). –b) दे$_3$ लिंग.(→लिङ्गं).

श्रीकालहस्तिशैलाख्ये स्थाने सर्वार्थसाधके ।
माघमासे मघर्क्षे तु पर्वयुक्ते द्विजोत्तमाः ॥ ८१ ॥

सुवर्णमुखरी पुण्या नदी यत्र स्थिता सदा ।
यस्यां गङ्गा मघर्क्षे तु स्नात्वा मुक्ताः स्वपातकैः ॥ ८२ ॥

यस्यां गोदावरी स्नात्वा विमुक्ता पापपञ्जरात् ।
यस्यामन्यानि तीर्थानि स्नात्वा मुक्तानि पाप्मभिः ॥ ८३ ॥

तस्यां स्नात्वा मुनिश्रेष्ठा जितक्रोधा जितेन्द्रियाः ।
श्रीकालहस्तिशैलेशं शीघ्रं संसारनाशनम् ॥ ८४ ॥

दृष्ट्वा प्रदक्षिणं कृत्वा प्रणम्य भुवि दण्डवत् ।
यथाशक्ति धनं दत्त्वा श्रद्धया शिवयोगिने ॥ ८५ ॥

ब्राह्मणेभ्योऽथवान्येभ्यो दिनमेकमुपोषितः ।
पुनः स्वमाश्रमं गत्वा पूजयध्वं महेश्वरम् ॥ ८६ ॥

देवदेवो महादेवः साम्बः सर्वफलप्रदः ।
आगमिष्यति तं पूज्य प्रसादात् तस्य सुव्रताः ॥ ८७ ॥

ऐश्वरं परमं ज्ञानं लब्ध्वा वेदान्तवाक्यजम् ।
छित्वा मायां महानन्दं भजध्वं मोक्षसंज्ञितम् ॥ ८८ ॥

इत्युक्ता मुनयो ब्रह्मन् ब्रह्मणा परमेष्ठिना ।
प्रणम्य दण्डवद् भूमौ ब्राह्मणा गद्गदस्वराः ॥ ८९ ॥

स्तोत्रैः स्तुत्वा महाभक्त्या नमस्कृत्य पुनः पुनः ।
श्रीकालहस्तिशैलाख्यं स्थानं ते मुनयो गताः ॥ ९० ॥

---

८२. –d) दे$_1$ स्वपापतः (→स्वपातकैः).
८३. –d) दे$_1$ पाप्मतः (→पाप्मभिः).
८४. –a) दे$_1$ °श्रेष्ठ (→°श्रेष्ठा). –c) दे$_3$ °धनं दत्त्वा (→°शैलेशं). –d) दे$_2$ शीघ्र (→शीघ्रं); दे$_3$ श्रद्धया शिव योगिने.
८५. –d) दे$_2$ °योगिना (→°योगिने).
८७. –d) दे$_2$ प्रसादा (→ प्रसादात्).
८८. –a) दे$_2$ ज्ञान (→ ज्ञानं). –c) दे$_3$ °नंद (→ °नन्दं). –d) दे$_2$ °संज्ञित (→ °संज्ञितम्).
८९. –a) दे$_1$ इत्युक्त्वा (→ इत्युक्ता); दे$_2$ ब्राह्मन् (→ ब्रह्मन्).
९०. –a) दे$_3$ स्तोत्रै (→ स्तोत्रैः).

## THE BOARD OF TRUSTEES

## OF

## THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A., D.Litt. Fort, Ramnagar, Varanasi (*Chairman*).

*Trustee nominated by the Govt. of India :—*

2. Vacant.

*Trustees nominated by the Govt. of Uttar Pradesh :—*

3. Sri Krishna Chandra Pant, Ex. Minister, Govt. of India, 7, Tyagraj Marg, New Delhi.

4. Sri Lok Pati Tripathi, Ex. Minister, Govt. of Uttar Pradesh, Aurangabad, Varanasi.

*Trustees nominated by His Highness, the Maharaja of Banaras :—*

5. Dr. R.N. Dandekar, Bhandarkar Oriental Research Institute, Poona.

6. Pt. Giridhari Lal Mehta, Varanasi; Managing Director; Jardine Handerson Ltd;; Scindia Steam Navigation Ltd.; Trustee : Vallabhram-Saligram Trust, Calcutta.

7. Padmabhushan Pt. Baladeva Upadhyaya, M.A. Sahityacharya, Vachaspati; Formerly Director, Sampurnanand Sanskrit University; Ravindrapuri, Varanasi.



Donation made to All-India Kashiraj Trust, Fort, Ramnagar, Varanasi, Will qualify for exemption under Sec. 80G of the Income Tax Act, 1961 in the hands of donors.

The 'Purāṇa', Bulletin has been started by the Purāṇa Department of the All-India Kashiraj Trust with the aim of organizing the manifold studies relating to the Purāṇas. It specially discusses the several aspects of text-reconstruction, of the interpretation of the vast cultural and historical material, and of the obscure esoteric symbolism of legends and myths in the Purāṇas.

The editors invite contributions from all those scholars who are interested in the culture of Purāṇa literature in which the religion and philosophy of the Vedas have found the fullest expression.

## ANNOUNCEMENT OF FOUR NEW PROJECTS

The All-India Kashiraj Trust has resolved to introduce four new Projects for the advancement of Puranic learning. The Trust heartily requests all interested in Puranic study for cooperation.

(1) Publication of monographs dealing with Puranic literature (i.e. works bearing the name of Purāṇa or Upapurāṇa) in all the regional languages of India. Each monograph should contain a detailed account of published works, of MSS. preserved in the libraries and the Private Collections and of works known through quotations.

(2) Publication of unpublished theses on important Puranic subjects.

(3) Publication of a series of monographs (not less that 100 pages) on the lives of the great sages as described in Puranic literature.

(4) Publication of Sanskrit Digests by traditional scholars on Puranic subjects. These digests may be published in the Bulletin also.

***RATNA OFFSETS LTD.***, *B. 21/42 A, Kamachha, Varanasi-10, Phone-322820*